श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
ओं नमो भगवते वासुदेवाय

महर्षि वेदव्यासप्रणीतं श्रीमद्भागवतमहापुराणम्

# ॥ तृतीयस्कन्धे प्रथमोऽध्यायः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

# श्रीमद्भागवतमहापुराणम्

## ॥ तृतीयस्कन्धे प्रथमोऽध्यायः ॥

श्रीशुक उवाच

एवमेतत्पुरा पृष्टो मैत्रेयो भगवान् किल।
क्षत्त्रा वनं प्रविष्टेन त्यक्त्वा स्वगृहमृद्धिमत् ॥ 1 ॥

यद्वा अयं मन्त्रकृद्वो भगवानखिलेश्वरः।
पौरवेन्द्रगृहं हित्वा प्रविवेशात्मसात्कृतम् ॥ 2 ॥

राजोवाच

कुत्र क्षत्तुर्भगवता मैत्रेयेणास सङ्गमः।
कदा वा सह संवाद एतद्वर्णय नः प्रभो ॥ 3 ॥

न ह्यल्पार्थोदयस्तस्य विदुरस्यामलात्मनः।
तस्मिन् वरीयसि प्रश्नः साधुवादोपबृंहितः ॥ 4 ॥

सूत उवाच

स एवमृषिवर्योऽयं पृष्टो राज्ञा परीक्षिता।
प्रत्याह तं सुबहुवित्प्रीतात्मा श्रूयतामिति ॥ 5 ॥

श्रीशुक उवाच

यदा तु राजा स्वसुतानसाधून्
पुष्णन्नधर्मेण विनष्टदृष्टिः।

भ्रातुर्यविष्ठस्य सुतान् विबन्धून्
    प्रवेश्य लाक्षाभवने ददाह ॥ 6 ॥

यदा सभायां कुरुदेवदेव्याः
    केशाभिमर्शं सुतकर्म गर्ह्यम्।
न वारयामास नृपः स्नुषायाः
    स्वास्रैर्हरन्त्याः कुचकुङ्कुमानि ॥ 7 ॥

द्यूते त्वधर्मेण जितस्य साधोः
    सत्यावलम्बस्य वनागतस्य।
न याचतोऽदात्समयेन दायं
    तमो जुषाणो यदजातशत्रोः ॥ 8 ॥

यदा च पार्थप्रहितः सभायां
    जगद्गुरुर्यानि जगाद कृष्णः।
न तानि पुंसाममृतायनानि
    राजोरु मेने क्षतपुण्यलेशः ॥ 9 ॥

यदोपहूतो भवनं प्रविष्टो
    मन्त्राय पृष्टः किल पूर्वजेन।
अथाह तन्मन्त्रदृशां वरीयान्
    यन्मन्त्रिणो वैदुरिकं वदन्ति ॥ 10 ॥

अजातशत्रोः प्रतियच्छ दायं
    तितिक्षतो दुर्विषहं तवागः।
सहानुजो यत्र वृकोदराहिः
    श्वसन् रुषा यत्त्वमलं बिभेषि ॥ 11 ॥

पार्थांस्तु देवो भगवान्मुकुन्दो
    गृहीतवान् स क्षितिदेवदेवः।

आस्ते स्वपुर्यां यदुदेवदेवो
    विनिर्जिताशेषनृदेवदेवः ॥ 12 ॥

स एष दोषः पुरुषद्विडास्ते
    गृहान् प्रविष्टो यमपत्यमत्या।
पुष्णासि कृष्णाद्विमुखो गतश्री -
    स्त्यजाश्वशैवं कुलकौशलाय ॥ 13 ॥

इत्यूचिवांस्तत्र सुयोधनेन
    प्रवृद्धकोपस्फुरिताधरेण।
असत्कृतः सत्स्पृहणीयशीलः
    क्षत्ता सकर्णानुजसौबलेन ॥ 14 ॥

क एनमत्रोपजुहाव जिह्मं
    दास्याः सुतं यद्बलिनैव पुष्टः।
तस्मिन् प्रतीपः परकृत्य आस्ते
    निर्वास्यतामाशु पुराच्छ्वसानः ॥ 15 ॥

स इत्थमत्युल्बणकर्णबाणै -
    र्भ्रातुः पुरो मर्मसु ताडितोऽपि।
स्वयं धनुर्द्वारि निधाय मायां
    गतव्यथोऽयादुरु मानयानः ॥ 16 ॥

स निर्गतः कौरवपुण्यलब्धो
    गजाह्वयात्तीर्थपदः पदानि।
अन्वाक्रमत्पुण्यचिकीर्षयोर्व्यां
    स्वधिष्ठितो यानि सहस्रमूर्तिः ॥ 17 ॥

पुरेषु पुण्योपवनाद्रिकुञ्जे -
    ष्वपङ्कतोयेषु सरित्सरःसु।

अनन्तलिङ्गैः समलङ्कृतेषु
    चचार तीर्थायतनेष्वनन्यः ॥ 18 ॥

गां पर्यटन्मेध्यविविक्तवृत्तिः
    सदाऽऽप्लुतोऽधःशयनोऽवधूतः।
अलक्षितः स्वैरवधूतवेषो
    व्रतानि चेरे हरितोषणानि ॥ 19 ॥

इत्थं व्रजन् भारतमेव वर्षं
    कालेन यावद्गतवान् प्रभासम्।
तावच्छशास क्षितिमेकचक्रा -
    मेकातपत्रामजितेन पार्थः ॥ 20 ॥

तत्राथ शुश्राव सुहृद्विनष्टिं
    वनं यथा वेणुजवह्निसंश्रयम्।
संस्पर्धया दग्धमथानुशोचन्
    सरस्वतीं प्रत्यगियाय तूष्णीम् ॥ 21 ॥

तस्यां त्रितस्योशनसो मनोश्च
    पृथोरथाग्नेरसितस्य वायोः।
तीर्थं सुदासस्य गवां गुहस्य
    यच्छ्राद्धदेवस्य स आसिषेवे ॥ 22 ॥

अन्यानि चेह द्विजदेवदेवैः
    कृतानि नानायतनानि विष्णोः।
प्रत्यङ्गमुख्याङ्कितमन्दिराणि
    यद्दर्शनात्कृष्णमनुस्मरन्ति ॥ 23 ॥

ततस्त्वतिव्रज्य सुराष्ट्रमृद्धं
    सौवीरमत्स्यान् कुरुजाङ्गलांश्च।

कालेन तावद्यमुनामुपेत्य
तत्रोद्धवं भागवतं ददर्श ॥ 24 ॥

स वासुदेवानुचरं प्रशान्तं
बृहस्पतेः प्राक् तनयं प्रतीतम्।
आलिङ्ग्य गाढं प्रणयेन भद्रं
स्वानामपृच्छद्भगवत्प्रजानाम् ॥ 25 ॥

कच्चित्पुराणौ पुरुषौ स्वनाभ्य -
पाद्मानुवृत्त्येह किलावतीर्णौ।
आसात उर्व्याः कुशलं विधाय
कृतक्षणौ कुशलं शूरगेहे ॥ 26 ॥

कच्चित्कुरूणां परमः सुहृन्नो
भामः स आस्ते सुखमङ्ग शौरिः।
यो वै स्वसॄणां पितृवद्ददाति
वरान् वदान्यो वरतर्पणेन ॥ 27 ॥

कच्चिद्वरूथाधिपतिर्यदूनां
प्रद्युम्न आस्ते सुखमङ्ग वीरः।
यं रुक्मिणी भगवतोऽभिलेभे
आराध्य विप्रान् स्मरमादिसर्गे ॥ 28 ॥

कच्चित्सुखं सात्वतवृष्णिभोज -
दाशार्हकाणामधिपः स आस्ते।
यमभ्यषिञ्चच्छतपत्रनेत्रो
नृपासनाशां परिहृत्य दूरात् ॥ 29 ॥

कच्चिद्धरेः सौम्य सुतः सदृक्ष
आस्तेऽग्रणी रथिनां साधु साम्बः।

असूत यं जाम्बवती व्रताढ्या
    देवं गुहं योऽम्बिकया धृतोऽग्रे॥ 30॥

क्षेमं स कच्चिद्युयुधान आस्ते
    यः फाल्गुनाल्लब्धधनूरहस्यः।
लेभेऽञ्जसाधोक्षजसेवयैव
    गतिं तदीयां यतिभिर्दुरापाम्॥ 31॥

कच्चिद् बुधः स्वस्त्यनमीव आस्ते
    श्वफल्कपुत्रो भगवत्प्रपन्नः।
यः कृष्णपादाङ्कितमार्गपांसु -
    ष्वचेष्टत प्रेमविभिन्नधैर्यः॥ 32॥

कच्चिच्छिवं देवकभोजपुत्र्या
    विष्णुप्रजाया इव देवमातुः।
या वै स्वगर्भेण दधार देवं
    त्रयी यथा यज्ञवितानमर्थम्॥ 33॥

अपिस्विदास्ते भगवान् सुखं वो
    यः सात्वतां कामदुघोऽनिरुद्धः।
यमामनन्ति स्म ह शब्दयोनिं
    मनोमयं सत्त्वतुरीयतत्त्वम्॥ 34॥

अपिस्विदन्ये च निजात्मदैव -
    मनन्यवृत्त्या समनुव्रता ये।
हृदीकसत्यात्मजचारुदेष्ण -
    गदादयः स्वस्ति चरन्ति सौम्य॥ 35॥

अपि स्वदोर्भ्यां विजयाच्युताभ्यां
    धर्मेण धर्मः परिपाति सेतुम्।

दुर्योधनोऽतप्यत यत्सभायां
साम्राज्यलक्ष्म्या विजयानुवृत्त्या ॥ 36 ॥

किं वा कृताघेष्वघमत्यमर्षी
भीमोऽहिवद्दीर्घतमं व्यमुञ्चत्।
यस्याङ्घ्रिपातं रणभूर्न सेहे
मार्गं गदायाश्चरतो विचित्रम् ॥ 37 ॥

कच्चिद्यशोधा रथयूथपानां
गाण्डीवधन्वोपरतारिरास्ते।
अलक्षितो यच्छरकूटगूढो
मायाकिरातो गिरिशस्तुतोष ॥ 38 ॥

यमावुतस्वित्तनयौ पृथायाः
पार्थैर्वृतौ पक्ष्मभिरक्षिणीव।
रेमात उद्दाय मृधे स्वरिक्थं
परात्सुपर्णाविव वज्रिवक्त्रात् ॥ 39 ॥

अहो पृथापि ध्रियतेऽर्भकार्थे
राजर्षिवर्येण विनापि तेन।
यस्त्वेकवीरोऽधिरथो विजिग्ये
धनुर्द्वितीयः ककुभश्चतस्रः ॥ 40 ॥

सौम्यानुशोचे तमधःपतन्तं
भ्रात्रे परेताय विदुद्रुहे यः।
निर्यापितो येन सुहृत्स्वपुर्या
अहं स्वपुत्रान् समनुव्रतेन ॥ 41 ॥

सोऽहं हरेर्मर्त्यविडम्बनेन
दृशो नृणां चालयतो विधातुः।

नान्योपलक्ष्यः पदवीं प्रसादा -
    च्चरामि पश्यन् गतविस्मयोऽत्र ॥ **42** ॥

नूनं नृपाणां त्रिमदोत्पथानां
    महीं मुहुश्चालयतां चमूभिः।
वधात्प्रपन्नार्तिजिहीर्षयेशो -
    ऽप्युपैक्षताघं भगवान् कुरूणाम् ॥ **43** ॥

अजस्य जन्मोत्पथनाशनाय
    कर्माण्यकर्तुर्ग्रहणाय पुंसाम्।
नन्वन्यथा कोऽर्हति देहयोगं
    परो गुणानामुत कर्मतन्त्रम् ॥ **44** ॥

तस्य प्रपन्नाखिललोकपाना -
    मवस्थितानामनुशासने स्वे।
अर्थाय जातस्य यदुष्वजस्य
    वार्तां सखे कीर्तय तीर्थकीर्तेः ॥ **45** ॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
तृतीयस्कन्धे विदुरोद्धवसंवादे प्रथमोऽध्यायः ॥